श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे द्वाविंशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे द्वाविंशोऽध्यायः ॥

राजोवाच
यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च
प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं
चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं
कथमनुमिमीमहीति ॥ 1 ॥

स होवाच
यथा कुलालचक्रेण भ्रमता सह भ्रमतां
तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव
प्रदेशान्तरेष्वप्युपलभ्यमानत्वादेवं
नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं
मेरुं च प्रदक्षिणेन परिधावता सह
परिधावमानानां तदाश्रयाणां सूर्यादीनां
ग्रहाणां गतिरन्यैव नक्षत्रान्तरे
राश्यन्तरे चोपलभ्यमानत्वात् ॥ 2 ॥

स एष भगवानादिपुरुष एव साक्षान्नारायणो
लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धि -
निमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो

द्वादशधा विभज्य षड्सु वसन्तादिष्वृतुषु
यथोपजोषमृतुगुणान् विदधाति ॥ 3 ॥

तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमा -
चारानुपथा उच्चावचैः कर्मभिराम्नातैर्योग -
वितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः
समधिगच्छन्ति ॥ 4 ॥

अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण
नभोवलयस्य कालचक्रगतो द्वादश मासान् भुङ्क्ते
राशिसंज्ञान् संवत्सरावयवान्मासः पक्षद्वयं दिवा
नक्तं चेति सपादर्क्षद्वयमुपदिशन्ति यावता
षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते
संवत्सरावयवः ॥ 5 ॥

अथ च यावतार्धेन नभोवीथ्यां प्रचरति तं
कालमयनमाचक्षते ॥ 6 ॥

अथ च यावन्नभोमण्डलं सह द्यावापृथिव्यो -
र्मण्डलाभ्यां कार्त्स्न्येन स ह भुञ्जीत तं कालं
संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं
वत्सरमिति भानोर्मान्द्यशैघ्र्यसमगतिभिः
समामनन्ति ॥ 7 ॥

एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत
उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां
मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव
पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते ॥ 8 ॥

अथ चापूर्यमाणाभिश्च कलाभिरमराणां
क्षीयमाणाभिश्च कलाभिः पितृणामहोरात्राणि
पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीव -
निवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता
मुहूर्तैर्भुङ्क्ते ॥ **9** ॥

य एष षोडशकलः पुरुषो भगवान्मनोमयो -
ऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षि -
सरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय
इति वर्णयन्ति ॥ **10** ॥

तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं
दक्षिणेनैव कालायन ईश्वरयोजितानि
सहाभिजिताष्टाविंशतिः ॥ **11** ॥

तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते
पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमान्द्य -
साम्याभिर्गतिभिरर्कवच्चरति लोकानां
नित्यदानुकूल एव प्रायेण वर्षयंश्चारेणानु -
मीयते स वृष्टिविष्टम्भग्रहोपशमनः ॥ **12** ॥

उशनसा बुधो व्याख्यातस्तत उपरिष्टाद् द्विलक्ष -
योजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण
शुभकृद्यदार्काद् व्यतिरिच्येत तदातिवाताभ्रप्राया -
नावृष्ट्यादिभयमाशंसते ॥ **13** ॥

अत ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय
उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो

राशीन्द्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्तते
प्रायेणाशुभग्रहोऽघशंसः ॥ 14 ॥

तत उपरिष्टाद् द्विलक्षयोजनान्तरगतो
भगवान् बृहस्पतिरेकैकस्मिन् राशौ
परिवत्सरं परिवत्सरं चरति यदि न वक्रः
स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ 15 ॥

तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः
शनैश्चर एकैकस्मिन् राशौ त्रिंशन्मासान्
विलम्बमानः सर्वानेवानुपर्येति तावद्भि -
रनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः ॥ 16 ॥

तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर
उपलभ्यन्ते य एव लोकानां शमनुभावयन्तो
भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं
प्रक्रमन्ति ॥ 17 ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे ज्योतिश्चक्रवर्णने द्वाविंशोऽध्यायः ॥